# Skandaproktam Maheshvaracharitam

# સ્કન્દપ્રોક્તં મહેશ્વરચરિતમ્

## Document Information

Text title : Skandaproktam Maheshvaracharitam

File name : skandaproktaMmaheshvaracharitam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 5 | 11-51||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં મહેશ્વરચરિતમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

સ્કન્દ ઉવાચ ।

ઈશાઙ્ગસઙ્ગો ભઙ્ગાય દુઃખાનામેવ કેવલમ્ ।
ભવતીશપ્રસાદેન ભવનાશો મહામુને ॥ ૧૧॥

શમ્ભોઃ કથાકર્ણનેન કર્ણૌધન્યતરૌ તવ ।
મમ વક્ત્રાણિ ધન્યાનિ લોચનાવલિરેવ મે ॥ ૧૨॥

શિવલિઙ્ગાલોકનેન કૈલાસે શઙ્કરાલયે ।
તૂર્ણમભ્યર્ણગા મુક્તિરપર્ણાપતિપૂજયા ॥ ૧૩॥

પાપારણ્યમહાદાવઃ શઙ્કરસ્યૈવ પૂજનમ્ ।
ન વિના શઙ્કરસ્યાર્ચાં સંસારોત્તારણં ભવેત્ ॥ ૧૪॥

ભસ્માઙ્ગરાગો યો ભૂયાદ્ભાવો ભવપદાર્ચકઃ ।
ભાવભાવં ભજત્યેવ ભાવ એવ હિ ભાગ્યવાન્ ॥ ૧૫॥

શઙ્ગલિઙ્ગાર્ચનેનૈવ પાપભઙ્ગઃ પ્રજાયતે ।
અનઙ્ગમાતઙ્ગહરપાદાર્ચકજનપ્રિયઃ ॥ ૧૬॥

ભવત્યેવ વિશેષેણ શામ્ભવો ભુવિ ભાગ્યવાન્ ।
મહાદેવસ્મૃતિઃ સદ્યો વિદ્યોતયતિ તં નરમ્ ॥ ૧૭॥

સુરં વા કિન્નરં વાપિ ઉરગં યક્ષમેવ વા ।
ગન્ધર્વં ગરુડં વાપિ કીટં પતગમેવ વા ॥ ૧૮॥

કરોતિ શઙ્કરકૃપા મોક્ષાયૈવ ન સંશયઃ ।
ન કિં દદાતિ સામ્રાજ્યં પ્રાજ્યં ભક્તેષુ કેવલમ્ ॥ ૧૯॥

યદુદારકથાસારસારસાનાં મહાત્મનામ્ ।
ભવન્તિ સમ્પદો નિત્યં સર્વેષુ સુખહેતવે ॥ ૨૦॥

ભાવૈકસુલભો દેવો ભક્તવશ્યો ભયાપહઃ ।
ભાવગ્રાહ્યોઽગ્રાહ્યનિગ્રાહ્ય ઇત્યાહાથર્વણી શ્રુતિઃ ॥ ૨૧॥

તેનૈવ સર્વમુક્ત્યર્થં સૃષ્ટં શઙ્કરપૂજનમ્ ।
નાસ્ત્યન્યત્તારણં નૃણાં વિના વિશ્વેશપૂજનમ્ ॥ ૨૨॥

કઃ સન્તરેત ભવદામસારાં સારવાસનામ્ ।
તાં મૃત્યુઞ્જયપૂજાર્થમુપયુજ્ય સુખી ભવેત્ ॥ ૨૩॥

તાં વિનાન્યત્ર ધર્મેજ્યાકરણે માસ્તુ તે પદમ્ ।
શ્રીમૃત્યુઞ્જયપૂજૈવ સુલભા મોક્ષદાયિની ॥ ૨૪॥

ન પૂજા પૂજકોવાઽસ્ય સ્વતન્ત્રસ્યેશ્વરસ્ય હિ ।
કિં તુ સર્વાભયાર્થં હિ સૃષ્ટં વૈ લિઙ્ગપૂજનમ્ ॥ ૨૫॥

લિઙ્ગેઽર્ચિતો મહાદેવો દદાતિ વિપુલાં શ્રિયમ્ ।
વિમુક્તિજનકં જ્ઞાનં દદાત્યેવ મહેશ્વરઃ ॥ ૨૬॥

યઃ સકૃદ્બિલ્વપત્રેણ દ્વિત્રૈર્વા પૂજયેદ્ભવમ્ ।
ભવો ભવહરો ભૂયાદ્ભાવાનાં નાત્ર સંશયઃ ॥ ૨૭॥

યસ્ય સમ્પૂજનાદેવ બ્રહ્મવિષ્ણ્વાદયઃ સુરાઃ ।
સેન્દ્રાઃ સવરુણા દેવા નિવસન્તિ ત્રિવિષ્ટપે ॥ ૨૮॥

અસુરા યક્ષરક્ષાંસિ મુનયો મનવસ્તથા ।
પ્રિયં લિઙ્ગાર્ચનં શમ્ભોર્નાન્યત્કિઞ્ચિન્મુનીશ્વર ॥ ૨૯॥

ન દાનૈર્નૈવ તપસા ન વર્ણાશ્રમધર્મતઃ ।
એતદ્ધિ સાર્થકં શ્રૌતં શ્રીમહાદેવપૂજનમ્ ॥ ૩૦॥

વિશ્વેશપૂજયા વિશ્વં સર્વં સમ્પૂજિતં ભવેત્ ।
વિશ્વાધિકો મહાદેવઃ સર્વવેદાન્તસંસ્તુતઃ ॥ ૩૧॥

સ્મૃતઃ સમ્પૂજિતો નિત્યં ધ્યાતો વા મુક્તિદાયકઃ ।
દર્શનં સ્પર્શનં લઙ્ગે "અયં મે" ઇતિ મન્ત્રતઃ ॥ ૩૨॥

સર્વપાપક્ષયાયૈવ મુક્તયે ભવતે નૃણમ્ ।
યો મહેશં સકૃદ્ધ્યાત્વા સ્વહૃદમ્ભોજમધ્યગમ્ ॥ ૩૩॥

ઉમાસહાયં ત્ર્યક્ષં ચ નીલકણ્ઠં સ સત્યભાક્ ।
માન્યઃ સુરાણાં સર્વેષાં મુનીનામપિ વૈ મુને ॥ ૩૪॥

મન્યે મહામન્યુસમો ન દેવઃ કરુણાકરઃ ।
અપરાધિષુ ભક્તેષુ સહમાનઃ સ એવ હિ ॥ ૩૫॥

ચુલુકં જલમાત્રં વા ત્રુટિતં બિલ્વજં દલમ્ ।
દદાતિ નિયમાદ્યો વૈ તસ્મૈ મુક્તિં પ્રયચ્છતિ ॥ ૩૬॥

બ્રહ્માદિદુર્લભં જ્ઞાનં દદાત્યેવ મહેશ્વરઃ ।
વિશ્વનાથો હ્યનાથં તં સનાથં કુરુતે નરમ્ ॥ ૩૭॥

સ્વભક્તં મન્મથારાતિરનાથજનવત્સલઃ ।
તસ્યૈવ ભક્ત્યા સુલભો મોક્ષો નો ધર્મકોટિભિઃ ॥ ૩૮॥

તસ્યેશસ્ય પ્રસાદાર્થં સૃષ્ટા હિ વિવિધાઃ ક્રિયાઃ ।
જપહોમાર્ચનધ્યાનવ્રતકૃચ્છ્રાણિ સત્તમ ॥ ૩૯॥

યોગઃ સાઙ્ખ્યં ચ તન્ત્રાણિ સ્મૃતયો નિગમા અપિ ।
આગમાશ્ચાપિ વિવિધા યન્ત્રતન્ત્રપરાણિ ચ ॥ ૪૦॥

શ્રુતયઃ સ્મૃતયઃ સર્વા વર્ણાશ્રમનિબન્ધનાઃ ।
બન્ધનાયૈવ સર્વેષાં ન મુક્ત્યૈ(ક્તેઃ) કારણં(સાધનં) ભવેત્ ॥ ૪૧॥

પ્રસાદકારણાન્યેવ ન પ્રસાદો ભવેદ્ધિ તૈઃ ।
પ્રસાદકારણં શમ્ભોર્ભક્તિર્યા નિશ્ચલા શિવે (?) ॥ ૪૨॥

ભક્ત્યૈવ ભવપાશેભ્યો મોચનં જાયતે નૃણામ્ ।
ભક્તિરેવ વિરૂપાક્ષે સદા કાર્યા મુનીશ્વર ॥ ૪૩॥

ભસ્માભ્યક્તતનુર્ભાવો ભવલિઙ્ગં સમર્ચયન્ ।
કાલમૃત્યોશ્ચ મુચ્યેત સંસારોદ્ધતસર્પતઃ ॥ ૪૪॥

રુદ્રાક્ષમાલાભરણો રુદ્રસૂક્તજપાદરઃ ।
પઞ્ચાક્ષરપરો નિત્યં સર્વદા શિવપૂજકઃ ॥ ૪૫॥

સ એવ મુક્તિકાન્તાયાઃ પતિરીશેન કલ્પિતઃ ।
રુદ્રક્ષેત્રાદિનિરતો વિરતો ભવસાગરાત્ ॥ ૪૬॥

જાગરુકઃ સદાઽતન્દ્રો ભવતીશ્વરચિન્તકઃ ।
જરામૃત્યુજગજ્જન્મ સુખદુઃખાકુલં જગત્ ॥ ૪૭॥

પશ્યન્મા પ્રમદો ભૂયાદ્વિશ્વેશપદપૂજને ।

આયુર્યાત્યેવ નિયતમામકુમ્ભે યથા પયઃ ॥ ૪૮॥

સમ્પદો વિપદસ્તા હિ સ્વર્ગે ધર્મે તુ નશ્વરાઃ ।
શોકમોહસમાક્રાન્તાઃ સસુરાસુરમાનવાઃ ॥ ૪૯॥

ધનં ક્ષયાન્તં સર્વેષાં પ્રિયાણાં વિપ્રયોગિતા ।
પરીક્ષ્ય સર્વં દુઃખાન્તં વિરજ્યેતેતિ હિ શ્રુતિઃ ॥ ૫૦॥

નાયુરાયાતિ હિ ગતં ધર્માર્થિર્થાનુચિન્તયા ।
સ્વસ્થો હૃત્સ્થં શિવં ધ્યાયેત્તેન દુઃખૈર્વિમુચ્યતે ॥ ૫૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં મહેશ્વરચરિતં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૫ । ૧૧-૫૧॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 5 . 11-51..

Notes:
Skanda સ્કન્દ; upon being requested by Jaigīṣavya જૈગીષવ્ય, elaborates about MaheśvaraCaritam મહેશ્વરચરિતમ્.
Skanda સ્કન્દ mentions the Śivaliṅga sparśa mantra શિવલિઙ્ગ સ્પર્શ મન્ત્ર viz. ayaṃ me ... અયં મે ... - which is as follows:
Ayaṃ me hasto bhagavān ayaṃ me bhagavattaraḥ .
Ayaṃ me viśvabheṣajo'yaṃ Śivābhimarśanaḥ .. Ṛgvedaḥ.10.60.12..

અયં મે હસ્તો ભગવાન્ અયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ઋગ્વેદઃ.૧૦.૬૦.૧૨ ॥

Proofread by Ruma Dewan

*Skandaproktam Maheshvaracharitam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*